# २०. लुब्धः शृगालः

कश्चन व्याधः आसीत् । सः एकदा मृगयार्थं वनं गतवान् । बहुकालानन्तरं सः एकं वराहं दृष्टवान् । तस्य उपरि बाणप्रयोगं कृतवान् । वराहस्य शरीरे महान् व्रणः जातः । व्रणितः वराहः कोपेन व्याधस्य उपरि आक्रमणं कृतवान् । स्वतीक्ष्ण-दंष्ट्राभिः तस्य शरीरं विदीर्णवान् । तेन व्याधः मृतः । बाण-प्रहारवेदनया वराहः अपि मृतः ।

तस्मिन् एव वने एकः शृगालः आसीत् । सः अतीव लुब्धः । सः शृगालः आहारान्वेषणं कुर्वन् तत्र एव आगतवान् । व्याधस्य वराहस्य च मृतं शरीरं दृष्टवान् । चिन्तितवान् च – 'अद्य मम दैवम् अनुकूलम् अस्ति । यथेष्टम् आहारः विनायासं लब्धः । एषः आहारः बहुदिनानां कृते पर्याप्तः भविष्यति । अतः प्रतिदिनम् अपि किञ्चिदेव खादामि' इति ।

अनन्तरं सः व्याधस्य शरीरं परिशीलितवान् । तस्य शरीरस्य पार्श्वे चापः पतितः आसीत् । चापे चर्मनिर्मिता रज्जुः बद्धा आसीत् । तत् दृष्ट्वा शृगालः 'अद्य एतां चर्मणः रज्जुं खादामि । अन्यत् सर्वं पश्चात् खादामि' इति चिन्तितवान् । चापस्य एकां कोटिं मुखे स्थापयित्वा दन्तैः रज्जुं जग्धवान् । परन्तु यदा रज्जुः भग्ना तदा चापस्य कोटिः शृगालस्य मस्तकं विदीर्य बहिः आगता । शृगालः तया वेदनया तत्क्षणे एव मृतः अभवत् ।